॥अलंकारतिलकप्रारभ्यः॥

श्रीगणेशाय नमः सायंकोमुदमातनोतु भगवान् कोलावतारोहरिः सिंधोः कूलमपास्य यस्य दशनप्रांते स्थिता
यस्य वः ॥ तारा हारतिवारिदस्तिलकतिस्वर्वाहिनीप्रोत्यति क्रीडादर्पणतिस्तपापतिरहश्चंद्रश्चतारेकति
॥ १ ॥ उरस्फुरदलंकारचमत्कारपटुश्रियः ॥ तनोतितिलकंमालेभारत्यानुसत्कविः ॥ २ ॥ अथरसा-
त्मानस्तंवंशरीरंकाव्यंतत्स्वर्गतिरीतिरीतिदोषतद्गावगुणालंकाराः इंद्रियाणिव्युत्पत्तयः प्राणाअभ्यासो
मनइति ॥ तत्राग्निपुराणेतार्किनिर्वाहकंपदकदंबकंशरीरं तदुष्टत्वेनचशायमानंरसाधायकंनचदुष्टका
व्यमेवनभवतीतियाच्यं । असतोदोषविचारानुदयात् । नहिगगनकमलस्यदुःसौरभादिकंकिंचायै
ते ॥ किंच ॥ तदल्पमपिनापेक्ष्यंकाव्यंदुष्टकथंचन ॥ स्याद्वपुःसुंदरमपिस्वित्रेनैकनदुर्भगं ॥ १ ॥ इतिद
ंडिवचनात् ॥ प्रत्यक्षसिद्धमपलपितुमशक्यं ॥ नहिस्वित्रदुष्टशरीरंशरीरमेवन भवति ॥ अदुष्टंच-
शरीरंनिर्दोषसगुणसालंकृतिशब्दार्थयोःसंघटनंतच्चलोकाययशसेचभवति ॥ अदुष्टमपिचत्रि
धा ॥ उत्तममध्यमाधमभेदात् ॥ उत्तमचमत्कारकारिव्यंग्यमुत्तमं ॥ मध्यमचमत्कारकारिव्यंग्यंम-
ध्यमं ॥ अस्फुटचमत्कारकारिव्यंग्यमधममितिकेचित् ॥ तन्न ॥ ध्वनिर्विरहिणशब्दार्थचमत्कारर
सासत्तिर्दर्शनात् ॥ तस्मात्तगुणालंकारवहलमुत्तमं ॥ अल्पतरगुणालंकारंमध्यमं ॥ गुणालंकारवि
रहितमधमं ॥ ध्वनिमत्ताचगौभीर्यंइतिव्यंग्यस्यापिगुणत्वमेव ॥ तच्चतुर्विधं ॥ संस्कृतं ॥ प्राकृतं ॥ अप
भ्रंशो ॥ मिश्रकंचतिगीर्वाणवाणीसंस्कृतंसाचद्विधा ॥ गद्यपद्यचेति ॥ प्राकृतंत्रिविधं ॥ तद्भवंतत्समो
देशीयश्चेति ॥ देशाद्भवोदेशीयः ॥ देशास्तुमहाराष्ट्रसासनगौडलाटमागधाः ॥ तत्रमहाराष्ट्रोद्भवास
म्यक् ॥ गोपादिगीरपभ्रंशः ॥ सकलमिश्रणान्मिश्रकंनाटकादि ॥ तदपिद्विविधं ॥ गद्यमगद्यचेति ॥ अ
पादंपदकदंबकंगद्यं ॥ तत्रचद्विविधं ॥ उत्कलिकाप्रायंगंधिश्चेति ॥ छंदोनुकारवर्णकलापरहित
पदसमुदायउत्कलिका ॥ छंदोनुकारकतिपयवर्णकलापकलितपदसमुदायः पद्यगंधिः ॥ तयोश्चरी
तिवृत्तिपुरस्कारेणपंचभेदाः ॥ चूर्णकं ॥ ललितं ॥ निष्ठुरं ॥ खंडकंचित्रकंचेति ॥ चूर्णकेउत्कारभट्टीवृत्तिः
वैदर्भीरीतिः ॥ ललितेकैशिकीवृत्तिः ॥ पांचालीरीतिः ॥ निष्ठुरेआरभटीवृत्तिः ॥ गौडीरीतिः ॥ खंडके-
सात्वतीवृत्तिः ॥ वैदर्भीरीतिः ॥ चित्रकेसर्वावृत्तिसांकर्यं ॥ उत्कलिकाप्रायं ॥ जटापटलसच्चलद्भरतरंगिणी
शीकरनिकरतारकितसकलदिङ्मंडले ॥ पद्यगंधिर्यथा ॥ भजतभजतदेवंशंभुममृतकरकलाकांतिचंद्र
नचयचर्चितकलेवरं ॥ चूर्णकंयथा ॥ प्रतिरूपकमिवसुधारूपस्यप्रतिफलमिवह्लादफलस्यप्रतिमानमि
वमाध्वीकस्यस्मितमस्यराधिकायाः ॥ ललितंयथा ॥ दरहसितकिरणकल्लोलकिर्मीरितनवचपलचकोरच
ंचूपुटकुटिलनेत्रंचनांचलेनराधिकयालुंटितनिजमनसः ॥ निष्ठुरंयथा ॥ जरदंकमठपृष्ठनिष्ठुरशाङ्गेलुंग
टंकारकल्पितप्रलयपयोवाहघोरनिर्घोषविभ्रमंश्रयन्श्रीपतिः ॥ खंडकंयथा ॥ किंवर्ण्यतामस्यरघुपतेरा
कारोनिराकरोरागस्यहासउपहासोमिथ्याज्ञानस्यनेत्रंप्रतिनेत्रंधर्मस्यचित्रकमुन्नयः ॥ लघुगुरुपुरस्कारे
णयःप्रवर्ततेसागतिः ॥ मुक्ताव्यगतयस्तिस्रः ॥ द्रुता ॥ विलंबिता ॥ मध्या ॥ चेति ॥ बहुभिर्लघुभिर्द्रुता ॥ अल्पैर्विलं
बिता ॥ समैर्मध्या ॥ मिश्रिताचद्विविधा ॥ द्विमिश्रिता ॥ त्रिमिश्रिता ॥ द्विमिश्रिताषट् ॥ द्रुतविलंबिता ॥ द्रु
तमध्या ॥ विलंबितद्रुता ॥ मध्यविलंबिता ॥ विलंबितमध्या ॥ मध्यद्रुता ॥ त्रिमिश्रितास्त्रयः ॥ द्रुतविलंबि
तमध्या ॥ द्रुतमध्यविलंबिता ॥ विलंबितद्रुतमध्या ॥ विलंबितमध्यद्रुता ॥ मध्यद्रुतविलंबिता ॥ मध्यविल
बितद्रुता ॥ सकलगतिमिश्रितागतिश्चबला ॥ सर्वगुरुः सर्वलघुश्चेत्यष्टावृत्तगतयः ॥ नचचतुर्मिश्रिता
दयोपिसंभवेयुरितियाच्यं ॥ गतिपोनरुक्त्यापत्तेः ॥ द्रुतविलंबितमध्द्रुतास्त्रयएवंद्रुतयः पैनरु
क्त्यंएवंसर्वगतिपोनरुक्त्यापत्तिः ॥ द्रुतायथा ॥ जयकेटमीनतवतनुविगलितशोरयपटलमिवप्रक
टयविनसत्रनिवहविचित्रं ॥ विलंबितायथा ॥ लंकाभर्तुर्यशोहंसंहंतुंनालिकमालिकामिवसेतुमकार्षीः
मध्यायथा ॥ हरसिहलधरहललेखिन्यावीर्यलिखितुमिवकालिंदीकल्लोलनिकरमषीधारासदृशान् ॥ एव
द्विमिश्रितादयऊह्यनीयाः ॥ गतिश्चबलायथा ॥ त्रिदशाकुलकिरीटकोटिमणिमयूखमंजरीपिंजरीकृतच
रणारविंद ॥ जनानंद ॥ नित्यगुणग्राम ॥ नीलोत्पलश्यामश्रीराम ॥ किंनामपरिमितधियामयावर्ण
नीयोसि ॥ एवंपद्यपिसर्वगतयोज्ञातव्याः ॥ शब्दार्थौकाव्य ॥ शब्दधर्मश्चरीतिः ॥ अतः प्रथमरीतिरुच्यते ॥
असमाससमासान्यतरमात्रपुरस्कारेणयाप्रवर्ततेसारीतिः ॥ नचरीतिरोषगुणेष्वतिव्याप्तिः ॥ मात्रपदे

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नत द्यावर्तनात्॥ रीतयश्चषट्॥ वैदर्भीआवंतीपांचालीगौडीलाटीमागधीचेति॥ तत्रईषत्समा
सावैदर्भीतिकेचित्॥ तत्र॥ समासविरहिणिज्यासः॥ किंतुबहुसमासहीनावैदर्भी॥ असमासाय
मपिविशिष्टभावस्यसत्वात्॥ साचतुर्विधा॥ असमासा॥ एकसमासा॥ द्विसमासा॥ संकीर्णाच॥ क्रमे
णोदाहरणानि॥ भुवागृहमयारण्यरामस्यकस्त्वयापथि॥ अथमुद्रेपुरंभीषुग्रत्ययंकःकरिष्यति॥१
स्तनयोरंतरायेमकिमासीदितिशंकया॥ भ्रमंतितवभृंगाःसिंहारास्ताराइवाकुलाः॥२॥ भवाणवत्रि
याकृष्टोभवंतंभगवन्भजे॥ सिंधोःपयसिगंभीरेसहिष्येरायनेकुतः॥३॥ लंकापतिर्यस्यधनुर्नि
नादमाकर्ण्यशाकाशतमादधानः॥ करेणमौर्वीरशिथिलादरेणयज्ञोपवीतंमुहुराममर्श॥४॥ चतुः प
दसमासा॥ आवंती॥ यथा॥ गोविंदलुब्धनयनारविंदामंदाननश्रीतरोचिः॥ राधास्फुरत्किंशुककुंज
पोत्वीमालीकरालीढकराप्रतस्थे॥१॥ पंचपदसमासापांचाली॥ यथा॥ आविर्भवत्पुलकशालिकपोल
पालिरिंदीवरद्युतिगभीरशरीरशोचिः॥ दृष्टोहरस्फुरदपांगतरंगदृष्ट्यावस्तोलुठन्मणिमयूरशचयो
मुकुंदः॥१॥ पंचाधिकपदसमासागौडी॥ यथा॥ संध्यानृत्यविलोलपन्नगपतिभ्राम्यत्फणामंडल॥
स्फूर्जत्प्रवातविधूतदिग्गजकुलप्रारब्धकोलाहलः॥ जृंभद्घूर्णितनेत्रवह्निनिपतत्स्फारस्फुलिं
गावलिज्वालावर्तितसप्तसिंधुसलिलस्तोमोहरःपातुवः॥१॥ अनकरीतिमिश्रालाटी॥ यथा॥ स
त्तामोनिधितीरहीरपटलालंकारिणीमेदिनीदासुविप्रकुलायथोजितवतःसंकल्पवाक्यात्यमं॥ ना
मीनीररुहास्तरोरुहभुवातत्कालमाविष्कृतेहस्तांभोरुहभार्गवस्यकिमपित्रीडास्मितंपातुवः॥१॥
आरब्धरीत्यनिर्वाहोमागधी॥ यथा॥ नासंध्यासमुपास्यतेयदितदालोकापवादात्भयंसाचेत्स्त्री
क्रियतेभविष्यतिरवौराजन्यबीजेनतिः॥ इत्यंकाक्षयलक्ष्मिरात्मभुपतेर्निश्वासकोष्णीकृतोद्ग-
म्रांतप्रतिबिंबशोणसलिलःसंध्याजलिःपातुवः॥१॥ इदंखत्राचिंत्यरीत्यनिर्वाहोरीत्यंतरप्रवेशः
तस्मान्मागध्यपिलाट्येवजाता॥ अनेकरीतिमिश्रणात्॥ इतिपंचचरीतयः॥ ननुकृत्कर्मोक्तिमाप्
दानांपृथक्पदत्वात्॥ सर्वत्रलाट्येवेतिचेत्॥ समासार्हपदानांसमासउक्तः॥ तेषांप्राधान्यप्रतीतेति

यमात्॥ अविमृष्टविधेयांशदोषाप्तेः॥ गौडीवैदर्भीपांचालीतितिस्रोरीतयइतिवामनः॥ अस्यमतेव
हुसमासागौडीति॥ अथवृत्तयोनिरूप्यंते॥ शब्दार्थव्यासज्यवृत्तिः॥ नचालंकारेतिव्याप्तिः॥ तस्यव्यास
ज्यवृत्तित्वाभावात्॥ शब्दनिष्ठस्ययमकोदेरर्थावृत्तित्वेअर्थनिष्ठस्योपमादेःशब्दावृत्तित्वं॥ नचमाधुर्यओ
जोलादिदोषेचव्याप्तिरितिव्याप्तिः॥ तत्रापिशब्दनिष्ठस्यार्थनिष्ठस्यचमाधुर्यस्यास्त्रीलस्यचभिन्नभिन्नजा
तीयत्वात्॥ तत्रकैशिकी॥ आरभटी॥ सात्वती॥ भारतीचेति॥ चतस्रोवृत्तयइतिप्राचीनाः॥ कैशिक्या
रभट्योर्मध्यमभेदात्षड्वृत्तयइतिकंठाभरणकारः॥ सुकुमारार्थसंदर्भाकैशिकी॥ प्रौढसंदर्भाकोम
लार्थामध्यमकैशिकी॥ अस्याधर्मोनर्म॥ तत्रभरतः॥ शृंगाररसभूयिष्ठा॥ प्रियाचित्तानुरंजकः॥ ग्रा
म्यपरिहासस्तुनर्मस्यात्तन्निधामतं॥ परीहासोविदग्धक्रीडितं॥ तस्यतुनर्मस्फूर्जनर्मस्फोटनर्मगर्भ
इतित्रयंभेदाः॥ अथमुत्सर्गः॥ यूनोर्नवानुरागनवदर्शननवसंगमजन्यस्फुरत्वानुभवोनर्मस्फूर्जः॥ युनोस्तु
वयावास्वार्थसिध्यनुकूलप्रच्छादनव्यापारोनर्मस्फोटः॥ युनोःकपटचेष्टयापरस्परमनोनिरूपणंनर्मगर्भः
कैशिकीयथा॥ तात्चरणानां॥ प्रेरयंतिहृदयंनलोचनंनर्तयंतिमदनंनदुर्यशाः॥ वारयंत्यविनयंनसंभ्र
मंस्नेहसारशारणंकुलस्त्रियः॥१॥ मध्यमकैशिकीयथा॥ श्याकोशाकोकनदशोककरःकरोयंरक्तश्चको
रमदचारमिदंचचक्षुः॥ उन्निद्रविद्रुमरहस्यहरोधरोयंतस्यास्त्वयस्यमपित्वयमनस्यमस्याः॥ भंत्रा
वंतीरीतिः॥ नर्मयथा॥ निर्यांत्याःसविधेनकापिविदधेवाचापिवाचातुरीलेभेवानमुखांबुजेस्मितपरी
हासोविकासोदयं॥ अस्ताः किंचिदुदंचितंसमभवद्विज्ञातमेतावताचेतः प्रेमकुरंगशावकदृशः स्छा
लीपुलाकोपमं॥१॥ नर्मस्फूर्जोयथा॥ अस्तंयातिगभस्तिमालिनितमोजालेजगत्यावृत्तेवेषंवामदृशः
प्रकल्प्यविशतोराधारहः प्रांगणं॥ बालेकात्वमसीतिवध्वनितानागृभिर्भयंविंदतागोविंदस्यचुचुंबु
तिर्वितरतुश्रेयांसिभूयांसिनः॥१॥ ननुशृंगाररसभूयिष्ठालालितानैशिकीमता॥ सौंदर्यसौकुमार्याभ्यांरो
द्राद्यावप्यसौभवेदितिचेत्॥ तस्मात्तस्याव्याप्तिरितिचेत्सत्यं॥ सौंदर्येशृंगारः॥ सुकुमारःसंदर्भः॥ तस्मा
देतौयत्रविशतःस्तस्परमिदं॥ यथारघुकाव्ये॥ सपदिगतमनस्कइत्यादि॥ प्रौढार्थसंदर्भाआरभटी॥ कोम

लसंदर्भा प्रौढार्थमध्यमारभटी॥ अस्याश्चत्वारो धर्माः॥ वस्तुत्यापनावपातसंस्फोटसंक्षिप्तयः॥ मायो
त्थापितंवस्तुवस्तूत्यापनंप्रवेशानिष्क्रमविद्रवहेतुरवपातः॥ क्रुधसंरब्धयोरन्योन्यमाघातः संस्फोटः।
महतः संग्रामस्यअल्पीयोनिदानंसंक्षिप्तिः॥ आरभटीयथा॥ तातचरणानां॥ भूयन्मौलितटीघुदर्शित
समारंभोयमंबोधरस्तत्रवइगः प्रतिपक्षपंकपटलंप्रक्षालयन् धारया॥ युधक्रुधविरुधांसिंधुरद्
लत्गंडस्थलप्रसरबलन्मुक्तामिः करकामिरामुसमरक्षोणीतलेवर्षति॥ मध्यमारभटीयथा॥ तव
मृगपतेप्रतापोदहनत्यापकतिव्याम॥ स्वर्णाचलः शरावतिकलशतिदेवः सरोजिनीकांतः॥ वस्तूत्था
पनंयथा॥ अत्रांतरेविरहविक्लैचक्यकीमायामयीद्रामुरवोरजनीमकार्षीत्॥ श्रीराघवोभटकुल
स्यविहस्यनिद्राविद्रावणायधनुषिध्वनिमाततान॥१॥ कोमलप्रौढसंदर्भाप्रौढार्थासात्वतीतिकेचित्
तन्न॥ वीरेरौद्रेतुतेशांतरतिर्भवतिसात्वतीतिभरतलिरवंनात्द्राताव्यासः॥ किंतुकोमलप्रौढसंद-
र्भकोमलाप्रौढयोरन्यतरार्थासात्वती॥ अस्याश्चत्वारो धर्माः॥ संघात्यसलापोत्थापनपरिवर्तकाइति॥ मं
त्रविस्तरेणपौरुषेन्यतरकृतसेनाभेदः संघात्यः॥ परस्परंगभीरोक्तिः संलापः॥ युधाप्रेरणमुत्थापन
प्रसक्तंकार्यमपहायकार्यांतरकरणंपरिवर्तः॥ कठारार्थायथा॥ तातचरणानां॥ देवत्वंपुरुषोत्तमासि-
नियतंतत्रापिरामोभवान्प्रस्थानेतवलक्ष्मणेवनमतिव्यक्तंयतोमेहिनी॥ हाकूपूर्वाचलपश्चिमाच
लकुचावावृण्वतीप्रोच्छलढक्कारावक्वलत्पयोधिलहरीचेलांचलेभ्यंचलेः॥ त्रयमेवेदमीतत्तागौडी॥ ३
कोमलार्थायथा॥ चंद्रश्चचुंबन्मधोमद्यपुत्रीक्रीडारसःस्फुर्जतुस्वैरंस्वैरमुपेतुचैरनवनीरंतावसंतानि
लः॥ नारीणामिवकिंतुकामविरहव्याधिप्रकोपस्पृशामस्माकंहरिविप्रयुक्तमनसामायुः परिक्षीयते॥१॥
आवंतीवेदभोमिश्रवृत्तिः॥ संघात्योयथा॥ रामस्यपार्श्वंसमुयाजगामविभीषणोभीषणबाहुवल्लिः॥ इ
तः किमुस्यादितिजातशंकारुरोदलंकाविहगस्वनेन॥१॥ कोमलप्रौढसंदर्भाकोमलार्थाभारती॥ नन्वु
भारतीयंभवेत्वृत्तिर्वीरहास्याद्भुताश्रयेतिलिरवनात्वीरव्यासिरितिचेत्सत्यं॥ वीररसेयत्रांगतया
हास्यादिप्रवेशस्तत्परमिदं॥ धर्मनियमप्रौढार्थकोमलार्थचोत्सर्गः॥ एषाचनाटकेप्रधाना॥ अस्याश्च

त्वारो धर्माः॥ आमुखंप्रहसनंवीथीप्रपंचनाचेति॥ आमुखंप्रस्तावना॥ हास्यमुखंप्रहसने॥ छलकाक्या-
क्तिप्रभृतयः त्रयोदशवीथ्यां॥ कविनायकपरिषत्सरूपनिर्वचनंप्रपंचना॥ भारतीयथा॥ पातिव्रत्यमिदंय
दीक्षसिमयासाकंरणेस्त्रीकुलस्यानंसाधयचाक्षोरवशाकलेचकंचमत्काराय॥ इत्यंस्वाभिरुचोनिरामयम
धुपव्याधूतनीलोत्पलहोणीदृक्कटाक्षपातसुभगंलक्ष्मणःस्मितंतपावुनः॥१॥ वेदर्भीगौडीचरीतिः॥ कोमलो
र्थः॥ प्रहसनंयथा॥ भिक्षोदिग्वास सोवासोभिक्षितुंसमुपागते॥ आसीद्दुर्गःस्मितज्योतिरुद्योतिमुखमंडलः
॥१॥ अनकवृत्तिरावलेय्यथा॥ रामेणवारिनिधिबंधनबंधुरेण।हेलाविभिन्नदशकंधरेण॥ रामोचितास्मित
रुचिस्मर्पिताधरेणसीतामुखेनिदधिरेनयनांतपातः॥१॥ प्रथमपरिच्छेदः॥ द्वितीयपरिच्छेदभरती॥ तृतीय
परिच्छेदभारती॥ चतुर्थपरिच्छेदकैशिकीति॥ ॥ इतिश्रीभानुकरविरचितेअलंकारतिलकेप्रथमपरिच्छेदः समाप्तः॥
अपदोषानिरूप्यंते॥ तत्रतत्ररसानुभवप्रतिबंधकोदोषः॥ सचज्ञायमानएवप्रतिबंधकः॥ अज्ञातेतस्मि
न्यद्यदोरसोसतिदर्शनात्॥ स्वरूपसतस्तस्यप्रतिबंधकत्वरसभ्रमानुदयापत्तेः॥ सचत्रिविधः॥ पदनिष्ठ
गजाननवाक्यनिष्ठोर्थनिष्ठश्च॥ नन्वयमकारावसदर्थदोषेऽव्याप्तिः अर्थदोषसत्यपिशब्दनिष्ठरसोस्त्ति
दर्शनादितिवाच्यंतन्निष्ठदोषस्यतन्निष्ठरसोत्पत्तिप्रतिबंधकत्वात्॥ अन्यथातिप्रसंगात्॥ तत्रपददोषाः
तत्रकंठाभरणकारः॥ असाधुवाप्रयुक्तंचकलंचानर्थकंचयत्॥ अन्यार्थकमपुष्टार्थमसमर्थंतथैवच॥१॥
अप्रतीतमथक्लिष्टंगूढंनेयार्थमेवच॥ संदिग्धंचविरुद्धंचप्रोक्तंयच्चाप्रयोजकं॥२॥ देवयज्ञाम्यामेतिस्य
पदोषाः स्फः पदसंश्रयाः॥ काव्यप्रकाशकारमते॥ अश्रीत्यवाचकानुचितार्थाविमृष्टविधेयांशाअधिकादो
षाः॥ अनुद्भासनान्नुमतमसाधु॥ नन्वासमर्थोहोजलंजलधेरहारमित्यादावतिव्याप्तिः॥ तत्रपदस्यसा
धुत्वात्॥ तन्नवाजघ्नेविषमविलोचनस्यवक्षइत्यादावतिव्याप्तिरितिचेत्सत्यं॥ तदसाध्येव॥ किंतु त
द्वाक्यगतमिहपदगतमितिविवेकः॥ यथागच्छध्वंकुरुमंबुधेरिति॥ एतच्चअनुकरणेनदोषाः॥ सि
द्धमपिकविभिरसंचारितमप्रयुक्तं॥ नचासाधावतिव्याप्तिः॥ सिद्धपदेनतस्यव्यावर्तनात्॥ नचास्लोले

अतिव्याप्तिः॥ रसविशेषेतस्यापिप्रयुक्तत्वात्॥ ननुकवयः कतिपयेयावंतोवाआद्येसर्वत्राप्रसिद्धिः॥ द्वि
तीयेतदवगंतुमशक्यमाविकवीनांअननुभवादितिचेन्न॥ कविभिःपूर्वसत्कविभिरित्युक्तत्वात्॥ यथा
तत्सत्संतेवचंतियत्॥ वचेरंतिपरस्यकवीनामनभिधानात्॥ कविभिर्ननिबद्धमित्ययोग्यमेवतत्सद्
भावमितिनास्ति॥ किंतुअन्वयबोधविघटनद्वारा॥ श्रुतन्नसद्भिनदोषः॥ श्रुतिकष्टकरंकष्टं॥ श्रुति
रित्युपलक्षणं॥ रसनाकटुरपिअवगंतव्यं॥ एकजातीयासरयोरेकत्रसमावेशोरसनाकटुरयया॥ स्म
रंतासियोषिति॥ श्रुतिकटुरयया॥ रिक्षुरिक्षुक्षिपक्ष्यक्षपक्ष्यक्षासीक्षणक्षणमिति॥ रौद्रेअस्यगुणत्वो
च्चरणमात्रपूरकमनर्थकं॥ यथा॥ सएवहिमहेश्वरः॥ अस्ययमकादोदोषाभावः॥ रूढिच्युतमन्यार्थकं॥
यथा॥ त्वन्मुखंकेसरिस्फीतं॥ केसरिशब्दः सिंहरूढः॥ केसरः किंजल्कमस्यास्तीतिपद्ममभिहितं॥ क्लिष्ट
मर्थेतिव्याप्तिश्चित्या॥ ग्रहेलिकायांगुणः॥ तुच्छार्थमपुष्टार्थं॥ यथा॥ सिंधुनंदननंदनः॥ बुधएतावतिवक्तु
व्येतावान्प्रयासः॥ क्लिष्टेतिव्याप्तिश्चित्या॥ अस्यछेदानुरोधेदोषाभावः॥ यथा॥ दृशापूर्वमुरगोहतः॥ सत्य
गर्थः समर्थः॥ कष्टेनद्वितीयोर्थोयत्रसभिधानेसमर्थं॥ नचप्रसिद्धिहतेव्याप्तिरिति॥ तत्रद्वयमपिसमर्थप्रसि
द्धमेकमितरद्प्रसिद्धमितिभेदः॥ यथात्वलंघेनीरदेहरिः॥ अस्यग्रहेलिकायांगुणः॥ शास्त्रमात्रप्रसिद्धमप्र-
तीतं॥ यथा॥ बभारपारिमांडल्यमिवपाणेहरिर्गिरिं॥ शास्त्रवित्समायांदोषाभावः॥ दुरार्थप्रत्यायकंक्लि
ष्टं॥ यथा॥ नगरिपुसुतसुतरिपुसदृशास्ते॥ नगरिपुरिंद्रस्तत्सुतोर्जुनस्तत्सुतोघटोत्कचस्तद्रिः कर्ण
इतिदूराद्वगम्यते॥ प्रसिद्धिसिद्धेनदोषः॥ अप्रसिद्धार्थगूढं॥ यथा॥ हरिरुत्सुत्यगच्छति॥ हरिरश्वो
वाचकोपिमंडूकेअप्रसिद्धः॥ अस्यापिप्रकरणप्रत्यासंबंधकाव्यदोषाभावः॥ स्वसंकेतितमसंकेतितंवा
नेयार्थं॥ यथामोधीकंपंकिद्दिष्टिकृत्॥ मधुनामानदैत्यपक्तिर्दशकृत्॥ दशावतारोहरिः॥ ग्रहेलिकायाम
स्यदोषाभावः॥ यथावा॥ तडिद्वासीद्भूतात्वयाअधमत्वेलक्षणाव्यंग्यालंकारेणः॥ अर्थसंदेहकरंसंदिग्धं॥
यथामयासनीक्षितोहरिः॥ तृतीयायांमाशब्दप्रयोगसंदेहः॥ प्रकरणेनिश्चायकदोषाभावः॥ निश्चितंसंदि

डा० सुंदर भाऊ राव गोडबोले यांच्या संग्रहातील MEMORIAL

ग्धार्थंयत्स्मारकंविरुद्धार्थकं॥ संदिग्धेतिव्याप्तिवारणायतिश्चित्तपदं॥ इदंविषणगतंविशेषणगतंसम
सगतं॥ क्रमेणोदाहरणानि॥ प्रियस्यपुलकश्रेणीकांताप्रीतिविपुचिका॥ यमस्नेहद्विवर्तलेसंयमइतिव्या
ख्यं॥ अत्रपूर्वमस्यास्मरणं॥ द्विजेस्तवगेहेद्यमद्यभक्ष्यंविधीयते॥ श्लेषलक्षणेदोषाभावः॥ अदीपक
मत्रयोजकं॥ यथा॥ रामः श्यामः समायातो॥ जगत्यभिप्रायेदोषाभावः॥ दृशासंकेतितंदेवं॥ यथा॥ वेदंवि
नाद्विजोरंडः॥ रंडइतिपामरेमेधिलसंकेतिते॥ महाकविप्रयोगेदोषाभावः॥ ग्राम्यंत्रिधा॥ अश्लीलं॥ घृ
णाकरंचेति॥ अश्लिलमपित्रिधा॥ अश्लीलार्थं॥ अश्लीलार्थांतरं॥ अश्लीलस्मृतिहेतुः॥ त्रितयमपियथा
रक्ततोमकुरंगह्निरूपाणीत्रोहितानना॥ योनिराधस्त्वयरक्षआयुधंतवसाधनं॥ एवमंगलत्रितयम
पियथानिशिनिद्रास्तुदीर्घाविहितामरयाचना॥ हारावालिरमूत्कंठं॥ एवंघृणाकरंत्रिधाउदाहरणीयं
॥ अश्लीलंसंस्तुताश्लीलंतत्रदृश्यएवदूषणं॥ यथावदुरित्यंसमीरणाः॥ एवमन्यदूहनीयं॥ कविसंरंभो
क्तिषुपस्थानेभगवान्॥ भगिनीग्रहृतिषुनदोषः॥ रसविपरीतारीतिररीतिः॥ यथा॥ रामोजघानबाणेन॥
वृत्त्यनुरोधायरीतीनांदोषाभावः॥ रिंगत्येषरणांगने॥ अत्रमध्यमारभटीवैदर्भीरीतिः॥ योगरूढयोरप्रतिपाद्य
कंमवाच्यकं॥ यथातवचक्रस्यगर्जितं॥ गर्जितंमघनादृतत्तुगर्जितमवाच्यकंनभयातिपरंतुचक्रस्यतिवो
च्यदूषणमिदमितिचिंत्यं॥ यथा॥ पांसुपिवासरोनिशा॥ निशापदेनतमोमयत्वमुक्तंतन्नतदवाच्यकं॥ अ
स्यरसमाधेगुणत्वं॥ यथानरसिंहस्यसकोपिकंठगर्जः॥ अनर्हार्थमनुचितार्थं॥ नचविरुद्धेतिव्याप्तिः॥
विपरीतप्रतीतिविरुद्धं॥ अधमत्वप्रतीतिरनुचितार्थमितिभेदात्॥ यथा॥ राघवातिपतिःपतीयसे॥
त्याःपतिरितिप्रतीयमानोर्थः॥ निंदायामस्यनदोषः॥ यथा॥ कुटिलस्तवकुंतलः॥ विधेयांशस्याप्रधा
न्येनाप्रतीतिरविमृष्टविधेयांशं॥ यद्यपिअन्वयविरोधित्वंनास्तितथापिविलंबितान्वयबोधजनकत्वे
नदूषकत्वं॥ यथा॥ द्वितीयमूर्तिर्मधुसूदनस्य॥ प्रसिद्धावयवस्यनदोषत्वं॥ यथामुखचंद्रोविराजते॥ निष्ठुर
संधिवदस्यापिवादोषत्वंअदुष्टस्यैवप्र — न्यस्य — रेणदुष्टत्वात्॥ नचात्रसमासस्तत्रासमासा
समासइतिनियमश्रुति — समास — दोषस्यापरिहार्यत्वादितिचिंत्यं॥ ॥अथवाक्यदोषाः॥

तत्रकेटा॥ भरणकारः॥ शब्दहीनंक्रमभ्रष्टंविसंधिपुनरुक्तिमत्॥ व्याकीर्णवाक्यसंर्णमपदंवाक्यगार्भितं॥
॥१॥ दृनिन्नलिंगवचनंदेवन्यूनाधिकोपमे॥ भग्नछंदोयतीचदेवभरीतिमत्॥२॥ वाक्यस्येतेमहा
दोषाः॥ षाडशैवप्रकीर्तिताः॥ काव्यप्रकाशकारमतेच॥ उपहतविसर्गलुप्तविसर्गपुष्टविसर्गपतत्प्रक
र्षसमासपुनरात्तानभिमतयोगायोंतरैकवाच्यकानभिहितवाच्यास्थानपदसमासप्रसिद्धिहतभग्नप्रक्र
मन्यूनपदाधिकपदमतपरार्थानिदूषणानि॥ इतरपदादयप्रयोगः शब्दहीने॥ यथा॥ रामाद्येनाध्वनिसं
चचार॥ चरंतस्तीयायोगादात्मनेपदं॥ विवक्षातोदोषाभावः॥ क्रमभ्रष्टंद्विविधं॥ विपर्यासच्युतभेदा
त्॥ उभयमपिपदा॥ पयोधराधरौविवहेमांबुजसहोदरौ॥ चक्षुर्मुरवंमुरवैतस्यास्सरवमदनैरवतं॥ संबं
धविज्ञानावेगविरहोन्माहादावदोषः॥ यथा॥ सत्वंरजः तमः पुंसामितिसंतित्रयोगुणाः॥ अंत्योमध्यः पर
त्रास्तिप्रथमस्त्वयिराघवे॥ १॥ विसंधिर्द्विविधा॥ निष्टरसंधिर्विगतसंधिः॥ उभयमपियथा॥ गिर्यार्यार्यायने
हित्वापाएष्यतिमेगृहं॥ प्रथमस्यरौर्द्वितीयस्यप्रगृह्यादौनदोषः॥ चंद्राकौकुभःकेलिस्खलितेकुंडले
इव॥ समानजातीयार्थेपुनरुक्तं॥ यथा॥ भीमोभीमोर्जुनोर्जुनः॥ अटनुप्रासेगुणः॥ यथा॥ चंद्रेचंद्राननेपश्य
मियोविभक्तीनामसंनिधेयंव्याकीर्णं॥ यथा॥ मयासहोहरिगतोबोधाविरोधपरांतरितेनदोषः॥ यथा॥ हर
स्मतत्रस्मितमातनोति॥ महावाक्यानुरोधेनवाक्यांतरणांतरितंवाक्यगर्भितं॥ नच्यव्याकीर्णेतिव्या
सिः॥ तस्यमहावाक्यानुरोधित्वात्॥ यथा॥ एह्येहिकोधिकोमत्तोमामनुस्मरराधिके॥ प्रश्नोत्तरेनदोषः॥
भिन्नलिंगवचनेयथा॥ समुद्रइवकौसल्यास्तानीवरघुरुद्वहः॥ अनुद्वेगचारोदोषः॥ रत्नंहारागृहेयस्य॥ न्यू
नाधिकोपमानेयथा॥ न्यूनंचद्विविधं॥ हीनोपमानंहीनविशेषणोपमानंच॥ अधिकमपिद्विविधं॥ अ
धिकोपमानंअधिकविशेषणोपमानंच॥ हीनाधिकोपमानेयथा॥ खद्योतइवतिग्मांशुः खद्योतस्ति
ग्मभानुवत्॥ महतोनिंदायांहीनोपम॥ हीनस्तुल्योऽधिकोपमानदोषः॥ भर्गवस्यप्रतापाग्येभास्वान्खद्यो
तेपातवत्॥ काकःकोकिलवत्क्रोडःक्रीडसिलंमहीरुहः॥ न्यूनाधिकविशेषणोपमानेयथा॥ चलच्च

कारशीतांशुरिंवराधेतवाननं॥ लतेवराजतेबाहुः॥ कणत्कनककंकणः॥ प्रसिद्धौनदोषः॥ मदनकरताल
नर्तितमधुकरइवचंचद्भुरेणारहस्याः॥ मृगनाभिबिंदुसुंदरमाननमिंदूपमंतस्याः॥ नयनेचचापलंचंद्रक
लेकइतिप्रसिद्धं॥ छंदोयतिभंगोस्फुटे॥ प्रेष्येग्रेऽनुज्ञासनात्स्थादिपूर्वस्य॥ वापादांतइतिपादांतस्यलघोः
यविभंगस्यस्वरसंधौनदोषः॥ क्रमेणोदाहरणानि॥ यथा॥ सीमंतेसिंदूरंतवदूरात्रेह्यंचंपकेषु॥ तरुणेर
स्यवलोहरिग्रहणंरहिर्वितर्कयते॥ अयिशांशिमुखिगछत्यध्वनिश्रीमुरारिः॥ अत्राष्टमस्थानेयतिभंगः
स्वरसंधिकृतोनदोषाय॥ क्रियाहीनमशरीरं॥ क्रियेत्युपलक्षणं॥ कर्मकृद्हीनमप्यवगंतव्यं॥ यथा॥ रामं
राजीवलोचनं॥ स्फुटंप्रतीयमानायांक्रियायांनदोषः॥ यथा॥ हृदयेतयिराघवे॥ अत्रास्तीतिस्फुटतरान्वि
या॥ शैथिल्यमरीतिः॥ शैथिल्यंसौकुमार्यकाठिन्यराहित्यं॥ यथा॥ ललनालालितालापकोमलालोललोच-
ना॥ गौडीयंगुणः॥ विसर्गस्त्रिविधः॥ विकृतोविकृतःपुष्टश्च॥ विकृतोलुप्तः॥ अविकृतउपहतः॥ पुष्टः स्प
ष्टः॥ त्रितयमपियथा॥ उतचंद्रउतपुरंदरउतनलइत्यादि कर्णेहतोनलोनीलोजनोदीनोजडोनृपःउतच
द्रउतपुरंदरउतनलउतविक्रमादित्यः॥ उतगंधर्वउतस्मरउतसुंदरिमैथिलोनृपतिः॥ मंदध्वंद्वः शरः-
क्रूरःकायःक्षामःस्मरःखलः प्रथमस्यप्रक्रमेनदोषः द्वितीयतृतीययोःकतिपयवर्णांतरितयोरदोषः॥ यथा
रामःक्षामकलेवरः॥ स्मरशरज्यास्फालुरःपालुनः॥ बालेबालोलनीलोत्पलदलनयनोगोपवेशोयदृष्टः॥
पतत्प्रकर्षयथा॥ प्रकर्षःसुशब्दनिष्ठः॥ जयदामोदरदानवदारणदीर्घदुःखदलनोदयदृप्तादूर्निरूपदुर्ग
र्शदुरत्ययविरचयकरुणामीशनमस्ते॥ त्रिपाद्यमकादौनदोषः कर्मकर्तृक्रियाभिः परिसमाप्तस्यवाक्य
स्यपुनरुपादानंसमाप्तपुनरात्तं॥ यथा॥ पातुवोपुंडरीकाक्षोदानवक्षोभवर्धनः॥ आकांक्षाविघटनद्वारा
स्यदोषत्वं॥ तथाचयत्राकांक्षातात्पर्यहेतुविशेषणेवानदोषः॥ तात्पर्ययथा॥ नमः स्तस्मैमहेश्वा
यभवसंतापशांतये॥ हेतुविशेषणंयथा॥ अद्यापसरिनापातःक्षुब्धःकुलिशमानसः॥ अभिमतयोग-
व्यतिरेकानभिमतयोगः॥ सचासमासगतः॥ समागतप्रकरणश्च॥ असमाससमासगतौयथा॥ दृक्पातेः

पातिताये नविद्दशास्त्वीन्नतेजसः॥अहोशारवामृगस्यमुजाशारवासुरखेलति॥१॥तीव्रतेजसाश्विकृतेमिम
तयोगोभवति॥व्यासस्यमुखमाद्दशंभवभूतिविभूषणं॥रसनाकालिदास्यमारतीरंगवेदिका॥भारत्याइति
कृतेसकलयोगोभवति॥अध्याहारेदोषाभावः॥अर्धांतरेद्वितीयार्धेएकस्यपूर्वव्याख्यान्वयिनोहत्वादेवैं
प्रधानस्यवाचकमर्धांतरैकवाचकं॥एवमर्धांतरेप्रथमार्धेएकस्यउत्तरव्याख्यान्वयिनोहत्वादेवाचकमर्धांत
रैकवाचकमवगंतव्यं॥पादेपिअर्धेपिपदविपर्यासात्व्याकीर्णं॥अर्धांतरैकवाचकस्यचैकार्धेपरार्धान्वयिनए
वेहत्वादेवाचकत्वमितितत्तोभदः॥यथाअंगेकुरंगाक्षिनेधेहिभूषांत्रहारसेहाररसोनयुक्तः॥तद्वित्यमाक
र्णयमद्वचासिसुधाविधुधैवमतांसुखाय॥१॥तथेतोरंगेनधेहिभूषानित्यन्वयस्तदुत्तरार्धपतिते॥वाच्यम
नभिहितंजनभिहितवाच्यंवाच्यमभिप्रेतंतत्र्यक्कचिन्मुख्यंक्वचिदपिचहिप्रकृतयः॥यथातातांघ्रिभक्ति
युक्तेनतयापिपितुराज्ञयाराज्यंत्यक्तंश्रितंकुजचनलूघंगुरोर्वचः॥१॥तातांघ्रिभक्तियुक्तोस्मीतिवक्तुयु
ज्यते॥श्रितंचेतिचरमपदहेत्वर्थस्याभिधातुमुचितः॥असमाजेपतितंजस्थानपतितं॥यथा॥नराजायेन
वीक्षितः॥नवीक्षितइतियुज्यते॥यथावा॥सरिक्कूरेतमःपूरेनालोकियदुनंदनः॥गत्वापियमुनाकुजमंज
नाचलहीधितिः॥१॥अजनाचलधरीधितिरितियदुनंदनेविषयेतत्समाजच्युतं॥व्याकर्णेतिव्याप्ति
श्चिंत्या॥अस्थानसमासंयथा॥चक्षुःकुवलयक्रीडकीडद्गजयोयतं॥मध्यमकैशिक्यांमध्यमारभ्यांनदो
षः॥प्रसिद्धिहतंयथा॥गर्जत्येषफणीश्वरः॥समाधानरोषः॥भग्नारंभोभग्नप्रक्रमः॥नचपतत्प्रकर्षेतिव्याप्तिः
तत्रप्रकर्षभंगोऽत्रचारंभभंगइतिभेदात्॥सचपंचविधः॥प्रकृतिप्रत्ययपर्यायसर्वनामोपसर्गभेदात्॥
प्रकृतिभंगोयथा॥स्मृतोहनवतीनाथोलक्ष्मीनाथोपिचिंतितः॥पुनरपिस्मृतइतियुज्यते॥प्रत्ययप्रक्रमभंगो
यथा॥गछन्कछंप्रियांप्रेक्ष्यरोमांचन्वर्ततेहरिः॥पश्यन्नितियुज्यते॥पर्यायप्रक्रमभंगोयथा॥शोणःकरकुरं
गाक्षिरक्तस्तेधरपल्लवः॥पुनरपिशोणइतियुज्यते॥सर्वनामप्रक्रमभंगोयथा॥हरेरस्यकथांतस्यचिंतनंने-
त्योत्सवः॥पुनरस्येतियुज्यते॥उपसर्गप्रक्रमभंगोयथा॥अनुस्मरस्मरारातिंविचिंतयविषंजगत्॥पुनरान्वे
तियुज्यते॥ननुप्रत्ययादीनांपुनरभिधानेकथितपदहेतापत्तिरितिचेन्न॥धर्मिधर्मोभयनिष्ठंकथितप

दंधर्ममात्रनिष्ठंभग्नप्रक्रममितिभेदात्॥वस्तुतस्तुद्वितीयस्थानेक्रमभेदोनदोषाय॥प्रथमएवनक्रमोभव
ति॥किंतुप्रथमारंभः॥पुनस्तत्करणेक्रमः॥तिनतृतीयस्थानेयदिभंगस्तदाक्रमभंगइत्यभिधीयते॥चित्रे
नदोषः॥यथा॥किंकिमित्याकुलःशिवः॥किंकिमित्युक्तंनचोद्दश्यमुक्तं॥नवोढासंभ्रमादिवाक्येनदोषः॥य
था॥किंकिमाकुलमसाधतांगनां॥अधिकपदंयथा॥कलावान्केरवद्युतिः॥चंद्रस्यचैत्यत्रप्रसिद्धमेव॥अस्याप्य
र्थविशेषप्रकर्षजातोचनदोषः॥यथा॥अश्रौषहयद्दषितं॥हयसाम्निध्यमर्थविशेषः॥द्वितीयंयथा॥अमिन
वविसकांतिछद्गोरःस्कंधांशुः॥अत्रकांतिविशेषःप्रतिपाद्यः॥तृतीयंस्फुटं॥अमतःपरोद्विया॥र्योयत्रतस्म
तपरार्थं॥इदंचश्लेषएव॥तथाचविरुध्योःश्लेषोपिनकर्तव्यः॥वारिदंविगतजीवनंशरत्॥कासहासरुचि
राव्यलोकयत्॥करुणहासेश्लेषणप्रतिपादितोतोचविरुधौ॥अगांगितयायत्रभासेततदानदोषः॥कृश
लंकारः॥कष्टरसश्चजातीयः॥यद्यपिअसाधुनिरर्थकाप्रयुक्तनिष्ठुरसंधिभग्नछंदोयतिअरीतिउपसर्गप
तत्प्रकर्षव्यतिरिक्तस्खलेर्थदोषंविनापदवाक्यदोषोनास्तितथापिसंप्रहायानुरोधेनातिरिक्तास्तेनिरूप्यते॥त
त्रकंठाभरणकारः॥अपार्थंव्यर्थमेकार्थंससंशयमपक्रमं॥खिन्नंचैवातिमात्रंचविरसंपरुषंतथा॥१॥हीनोप
मंसमंवाप्यन्यदधिकोपममेवच॥अप्रसिद्धोपमंचान्यदसदृशोपमंतथा॥२॥निरलंकारमश्लीलंविरुद्धमि
तिषोडश॥काव्यप्रकाशकारमते॥अपुष्टव्याहतंनिर्हेतु॥अननीकृतंनियमपरिवृत्तेअनियमपरिवृत्तंविशेषप
रिवृत्तंअविशेषपरिवृत्तंसाकांक्षंमयमुक्तंसहचरभिन्नंविधेयुक्तमनुवादायुक्तंसक्तपुनः स्वीकृतंचेतिदूष
णान्यतिरिक्तानि॥वाक्यैकवाक्यतामनापन्नमपार्थकं॥यथा॥कुरंगोस्तिविहंगोस्तिमृगास्तिकिमितस्ततः॥
उन्मत्तबालायुक्तोनदोषः॥यथा॥कचंद्रकगतासिसुंदरिकुतोगछामिपश्यप्रिये॥व्यर्थंयथा॥आगतंत्रेक्ष्य
राघवं॥अनागतस्यदर्शनायादागतमितिविशेषणंव्यर्थं॥कामिनीरीर्घसंतापोक्तौशांतानांधर्मोपदेशोचन
दोषःप्रथमंयथा॥उदितंपश्यशीतांशुं॥एकार्थंयथा॥गछत्यस्तंचरमजलधिंगाहतेशीतरोचिः॥गछतिगाहतेइ
त्योसध्यासमयएवउक्तः॥अर्थपुनरुक्तमत्रेवांतरैभवति॥यथारविरुणःपुनातुनः॥रक्षतुवेशमूरवेव्युत्सादनेचन
दोषः॥अन्यविघ्नमिदंनिस्वमुक्तरत्नमिदंजगत्॥ससंशययथा॥बुधोमित्रगृहंगतः॥विरुद्धोक्तौतरुणयोःप्र
छादनोक्तौचनदोषः॥यथा॥दिवासस्थलंभूरियदयंरसदुर्दिने॥अपक्रमंयथा॥द्विजेभ्योदक्षिणांदत्वादेवोयज्ञ

मुपाचरत्॥ चित्रोक्तौनदोषः॥ नाभिकुंडेस्मरोहोताहोमाग्निंस्थापयिष्यति॥ रोमालिच्छद्मनापूर्वमुत्थिता धूमधो
रणी॥ रीत्यायनिर्वाहः खिन्ने॥ इदंशाद्दूषणंभवितुमर्हति॥ अनुद्वेगकृद्दूषणं॥ निशाकांतामतिदीपः स्वेयः
केलिनिकेतने॥ विद्यामालेवकेऽस्यभाग्यसंपन्ननीषिणः॥ इवशब्दानुद्वेगकरणं॥ असंभवार्थमतिमात्रे॥ म
धुवन्नामयंजगत्॥ विनयोक्तावप्युक्तालंकारेचनदोषः॥ प्रत्येकंयथा॥ कुलमद्यप्रदीपोमेत्वयिसभ्रसमागते॥
मेरुः सर्षपवद्यस्यखुरक्रोडेनिलीयते॥ अनुचितार्थंपरुषं॥ यथा॥ आर्याहितल्पमेणाक्षिमातस्त्वंमुंचमेगृहं॥
उपदेशेरौद्रेचनदोषः॥ उभयमपियथा॥ कालव्यालमुखेतिष्ठनतिष्ठन्नृपसद्मनि॥ दुष्टश्चेत्कौरवः क्रूरोगुरु-
र्यगुरुर्नमे॥ विरुद्धरसंविरसं॥ ननुविरसोरसदूषणमित्रिचेदसत्यं॥ अर्थदोषोपिभवतिइत्यर्थदोषावसरउ
क्तं॥ आलिंगमांप्रियेतातंमृतंकिमुतशोचसि॥ शोकस्यगारावकृत्रानुचिते॥ अंगांगिभावायत्रयोर्दूषणं॥ यथा॥
पूरोभूमिसुवःस्मरवद्दनोमद्दनोज्वलः॥ इशास्यमुखमादर्शेदर्शयामासराघवः॥ अत्रवीभत्सांगं॥ हीनाधिकोप
मयोरनुद्वेगस्तेषेचादूषणं॥ प्रथमंपूर्वमुद्दाहृतंद्वितीयंयथा॥ पुरुषोत्तमएवासिराजन्किमभिधीयते॥ अत्र
सिंहोपमेयथा॥ दंतायुंजाफलोपमाः॥ अनुद्वेगचादूषणं॥ तवचेतोबुधिस्तत्रसरस्वत्यपितिमाधवः॥ असदृशो
पमेयथा॥ कृष्णः पीतांबरोधाराधरधाराधरोपमः॥ व्यतिरेकोपमायाम॥ दूषणं॥ यथा॥ सर्वथानोपकुर्वंतिदुर्ज
नाःसज्जनाइव॥ अलंकारमात्रराहित्येनिरलंकारः॥ अलंकारोर्थालंकारः॥ मात्रपदंस्थितेनेतिवाक्षिवारणाय॥
यथामाधवोयुधिवीक्षितः॥ रसपुष्टावदोषः॥ यथामद्येकः पुरंदरः॥ अत्रवीद्दरसःपुष्टः॥ अश्लीलंयथा॥ अनं
गायतनंपश्यत्यजस्वर्गसुरवस्त्रियं॥ अस्यपूर्वतुसर्वान्यवस्थ॥ विरुद्धंयथा॥ प्रकाशितलोकसमयस्यदेशप्र-
सिद्धिसंग्रहायतुत्यौचित्यप्रतिज्ञाधर्मार्थकामसंगीतशास्त्राणांविरोधास्यत्रयोदृशाभवंतः॥ गुणेबध्नातिको
दंडंदूरंतेनशरोगतः॥ अनुबंधमितिप्रकाशितंशरः पलायितइतिविरुद्धं॥ विरोधालंकारेनदूषणं॥ यथा॥ ब
धःकमितिकुंतलस्तवपुनर्मध्याः परिक्षीयते॥ लोकिसैविधंयथा॥ वाजीवहतिकंहिल॥ बालप्रबोधोकौनदो
षः॥ समयविरुद्धं॥ ककिकोकिलनिक्वाणकोमलाः सकलादिशः॥ अनयोरेकसमयेनिषिद्धः॥ चित्रोक्तावुपतेच्च

नदोषः॥ अहोविकसतिव्यक्तंनक्तंरुद्धतिःसरसं॥ देशविरुद्धंयथा॥ कालिंद्याःपुलिनैतुगौर्हिम्नातंगैनिषेव्य
ते॥ पौरुषवर्णनेनदोषः॥ सोयंलंकेश्वरोयस्याचंद्रार्कौपार्श्वचारिणौ॥ चंद्रार्कयोर्नभोदेशः॥ प्रसिद्धिविरुद्धंय
था॥ चक्रेचक्रायुधंस्मरः॥ उत्प्रेक्षायामदूषणं॥ यथा॥ कामःकलावतीकोधादिंदुचक्रेकरेदधौ॥ संग्रहायविरुद्धं
यथा॥ गोपतिः वपीनतयंवुराशिमिंदुछविंबिंबमिवाललंबे॥ अब्धिःश्यामइतिकवीनांसंग्रहायः॥ विस्मयो
नदोषः॥ शुभ्रीकृतोभक्तीत्याकरिक्काणेनलक्ष्यते॥ युक्तिविरुद्धंयथा॥ गेहेगेहेविधूदयः॥ असंभावितोपमा
यामदूषणं॥ मुधासर्पेनृपेकृपा॥ प्रतीतिविरुद्धंयथा॥ धन्यापुरीयतिर्यत्रक्रीडिकांतांनमुंचति॥ हस्यरसेनदो
षः॥ औचित्यविरुद्धंयथा॥ निल्वस्यसुरवयंसंगंचारुचामरमारुतः॥ देवताप्रसादादीनदोषः॥ तरंगतरलीभ
वत्कल्यहिषाचसुषेवुषारगिरिकन्यकेयमधमंजनंपश्यसि॥ पयोधरमहीधरेनतितस्यवामभुवोरु
णत्कनककिंकिणीकलरवेणदेवःस्मरः॥ १॥ एवमन्यान्यपिविरुद्धानिज्ञेयानि॥ अपुष्टंयथा॥ विधुर्गगनसंग
तः॥ इतिहासेजात्याहीनदोषः॥ व्याहतंयथा॥ किमनयाकलयारजनीपतेनयनयोर्ममसेवविधेःकला॥ किं
कलयेतिव्याहत्यपुनःकलायाएवस्फुतिःकृता॥ समानजातीययोरेकप्रकर्षेकचिद्दूषणं॥ यथा॥ सन्निधेस्तव
वक्त्रेदोरिंदोकिंतेप्रयोजनं॥ अनवीकृतोयथा॥ आलंचित्तैरलंवित्तैः श्रीरामोयदिनस्तुतः॥ पुनर्व्यर्थमितिप्रयुज्य
ते॥ अत्रदंचित्यं॥ अलंकृत्यापुनरलंचेदनवीकृतोदोषः॥ पादांतरकरणेपर्यायभंगः॥ तेनमुमयतःपाशः॥ किं
चेदमपिशब्दपुनरुक्तं॥ नियमपरिवृत्तंयथा॥ सूर्यवंशोगृहंतत्रदीपएवरघूद्वहः॥ एवकारेणान्ययोगव्यवछे॥
दोलभ्यते॥ तदनुद्देश्यं॥ उद्देश्यतायामदोषः॥ इदमपिव्यर्थमेवदूषणं॥ अविशेषपरिवृत्तंयथा॥ गौरीकुरुकुरंगाक्षि
हारंहासितरोचिषा॥ श्वेतस्यश्वेतयकरणंनप्रकर्षाय॥ अतिशयविशेषेचवाच्येनदोषः॥ यथा॥ रक्तस्तवास्मितलि
ग्धःक्षीरहासितमौक्तिकं॥ साकांक्षंयथा॥ येनविनायस्यनस्वार्थानुभवंतस्यसाआकांक्षा॥ प्रहस्येषराघवः
विपक्षमित्याकांक्षति॥ विरहोन्मादेनवोढाभिलाषचनदोषः॥ इदमपिशब्दूषणं॥ आकांक्षायोग्यतासत्तीनांशा
द्वनिष्ठत्वात्॥ अनादेयपदयुक्तंअपदयुक्तं॥ भुवनेधरणीमुकाविमुक्ताकरुणीगृहे॥ रामोहमितिजीवामिसर्वदुष्क
र्मणांफले॥ तृतीयपदएवपर्यवसन्न॥ चरमपदमनादेयं॥ हेतूपन्यासेनदोषः॥ हेतुहीनंनिर्हेतु॥ यथा॥ तीरेनीरनि

धेरिदुः प्रायश्चित्तमिवाचरत्॥ प्रायश्चितेहेतुनोक्तः॥ प्रसिद्धौनदोषः॥ यत्कारामणेमैथिली॥ ज्ञानापवादःप्रसिद्धेहेतुः॥ सहचरभिन्नंययाजयेतांब्राह्मणः काकोदक्षिणेशकुनःसतां॥ अनयोःसहचर्यंनयुक्तं॥ अत्रधानीभूतेसहार्थेनदोषः॥ रामोजगामसंग्रामंत्रागणैकपिभिःसह॥ अत्रधानीभूतसहार्थेतृतीयेत्यनुशासने॥ पर्यायस्यवाक्यस्यपुनरुपादानेयत्कपुनःस्वीकृतं॥ यथा॥ अस्तिस्वस्तिकरःकृष्णःसोपिशीलमुशारवरः॥ सोपीत्यनेनपर्यायस्यपुनरुपादानं॥ साक्षाच्छ्रवणदोषः॥ एतस्यदीपकस्यगुणत्वं॥ आवृत्तेरलंकारत्वंनस्यात्॥ अपिचुचुर्भिर्पीरित्यत्रकस्यचस्वीकारादितिचिंत्यं॥ विधार्यायुक्तंविधेयुक्तं॥ यथालक्ष्मणशरवारितः॥ समितिरावणोधावतीति॥ विध्यर्थानुपूज्यते॥ निशांतउक्तोनुवादायुक्तोयथा॥ उग्रपालयमेदिनीं॥ उग्रेत्यनुवादोरक्षणेयुक्तः॥ नामाभिधानेनदोषः॥ यथा॥ भीमसंरब्धमामितः॥ अयुक्तंविरुद्धार्थांतरएवांतर्भवतीतिकिंचार्यं॥ अयोगसापेक्षासत्संसर्गासमर्थरूपकापुष्टविशेषणासंगतयश्चपरेदोषाः॥ योगरूढैयोगानन्वयोयोगः॥ यथामनोविनोदंत्येतेस्वर्धुनीपंकजानिलाः॥ स्वर्नद्यांपंकजाभावात्पंकजस्ययोगोनुपपन्नः॥ सापेक्षंयथा॥ हृस्वंमध्यस्थलंतव॥ मृणालोद्धरवधेरपेक्षाह्रस्वस्येति॥ असमीचीनस्यार्थस्यसंसर्गःअसत्संसर्गः॥ यथा॥ युधेभंगोभवतुभवतोवैरिभूमीपतीनां भवतश्चितिपदस्यभंगसन्निधानंचविरुद्धमितिरुद्रटार्यः॥ तस्यसमासमात्रविषयकत्वात्॥ असमर्थरूपकंयथा॥ मुरपक्षेतमोहंतिं॥ तमोहननानुकूलंपद्मरूपकं॥ वाच्यानुकूलमपुनर्यथा॥ यशस्तमीपतिद्युति॥ सुधापतिकरणेपुनरर्थः॥ तत्करणेश्यामप्रवेशः॥ असंगतिः॥ संगत्याभावःस्वचर्यंयादृ॥ ॥ इतिश्रीमद्भानुकरमिश्रविरचितेरसालंकारतिलकेदोषतद्धारनिरूपणंनामद्वितीयःपरिच्छेदः॥ ॥२॥ अथगुणास्तत्रकंठाभरणकारः॥ श्लेषःप्रसादःसमतामाधुर्यंसुकुमारता॥ अर्थव्यक्तिस्तथाकांतिरुदारत्वमुदात्तता॥१॥ ओजस्तथान्यदीर्जित्यंप्रेयान थसुश्लिष्टता॥ तद्वत्समाधिःसौख्यंचगांभीर्यमथविस्तरः॥२॥ संक्षेपःसंमितत्वंचभाविकत्वंगतिस्तथा॥ रीतिरुक्तिस्तथाप्रौढीरित्येवांबलस्थलक्षणे॥३॥ गुणास्त्रिविधाः॥ बाह्याआंतराश्चदोषाश्च॥ बाह्याःशब्दाःआंतराअर्थाः॥ वैरोपिकारोषगुणाः॥ नन्वेतेषांकर्षहेतुर्गुणःअलंकारेतिव्याप्तेः॥ नचोत्कर्षहेतुत्वेसतिसमवायवृत्त्यावर्तमानोगुणःश्लेषसमाधिप्रभृतिष्वव्याप्तेः तयाचसहजोत्कर्षहेतुर्गुणःअलंकारस्योपाधिरुत्कर्षहेतुत्वादितिप्रयः

सुकुमारताकांतयोर्माधुर्यमेवसतोमेवैषम्याभावःअर्थव्यक्तिःप्रसादःउदात्तताअनुप्रासालंकारःसुश्लिष्टता-असभ्यार्थतायाअभावःअन्यत्रान्यस्यगुणारोपःसमाधिःसौख्यंसंक्षेपेविस्तरश्चौपाधिकएवेतितेषामलंकारत्वंअतएवसमाधिसौख्यमप्रयउदात्तप्रभृतीनांअलंकारगणनायांवदंडीकारलिरवनेसंमितमतिरिक्तंनुनयोरभावःश्लेषोविसंधयभावःतेनप्रौढिमाधुर्यप्रसादौजोगांभीर्यपाकएवगुणाःपाकस्तुरसविशेषोत्पत्तिजनकोगुणसमुदायःनचौजोगौडीवृत्तिःतच्चेद्गुणःस्याद्वैदर्भीमपीत्समासोगुणःस्यादितिवाच्यंतस्यापिमाधुर्याभिधानगुणत्वात्॥ ननुमाधुर्यंकाटवाभावःप्रसादोव्याकीर्णभावएवमेतेपिदोषाभावाएवेतिचेत्सत्यं तारत्वमंदत्वयोर्यथातारत्वनुभावादितरेतरमभावात्मतानास्ति तथापिमधुरतरप्रसन्नतरगंभीरतरपक्वतराद्यनुभवात् अत्राप्यंतरजातिकल्पनाभावेजात्यनयुपगमात्॥ तथापिसंप्रदायानुरोधेनतथ्यगुच्यंते॥ पदयोःसम्यक्संधिःशब्दश्लेषः॥ सम्यगर्थनिर्देशोर्थश्लेषः॥ उभयमपियथा॥ धावन्त्यामृगशूतायामन्योन्यमुपलालपिते॥ गतयोरीशयोःकुंडमेकमास्यमुपासहे॥१॥ कर्मकर्तृक्रियाणांप्रसिद्धानांसमावेशःशब्दप्रसादः॥ सकलप्रसिद्धमंगिभिर्यविन्यासोर्थप्रसादः॥ उभयमपियथा॥ युवतिविरहभाजायन्मयाभर्त्सितोसिक्षणमपिनसुधांशोमत्किमिर्मावितोसि॥ तदखिलमपहर्तुंमूर्ध्निधर्तुंभवंतंस्फटिकरुचिरजटालंड्यालिरावंसमरामि॥१॥ उपक्रांतस्यबंधस्यसमताशब्दसमता॥ बंधस्त्रिविधोमृदुस्फुटामिश्रश्च॥ मृदुर्वैदर्भी॥ प्रस्फुटीगौडी॥ मिश्रोलाटी॥ प्रारब्धस्यार्थस्यनिर्वाहोर्थसमता॥ उभयमपियथा॥ किमुरसिगरिमाकिमालिमध्यतवत्तनिमाकिमुचकिमादृशोर्वा॥ क्वचसिमधुरिमाकिमप्यदेहेतवपटिमास्मुरतिमावितर्कः॥१॥ वैदर्भीरीतिरयोवयःसंधिः॥ ईषत्समासःशब्दमाधुर्यं॥ क्षमाअर्थमाधुर्यं॥ यथा॥ तातचरणानां॥ नारुण्यंमुखमंडलेनचवचोवैदग्ध्यमन्यादृशीनात्रूभंगपरिग्रहेनचरहःप्रश्नेपिमौनस्थितिः॥ एतत्संप्रतिसंजनातिमनसःकोपंनयद्दयितेस्वाधीनेपिपुरेवपंकजदृशोयत्प्रेमलग्नग्रहः॥१॥ अनुनिष्ठुरप्रायंसुकुमारं॥ असंभवदारुणायप्रायःपदं॥ क्षमंत्वद्विविधं॥ निष्ठुरमनिष्ठुरंच॥ महाप्राणंनिष्ठुरं॥ अल्पप्राणमनिष्ठुरं॥ अर्थस्याकाठिन्यमर्थसुकुमारता॥ यथा॥ पुष्पमालाश्रमंबालाकथमेषासहिष्यते॥ इतिचिंतांवहन्मध्यःकृशोमृगदृशोभवत्॥१॥ अर्थप्रतिपादकः

